# મધુરાષ્ટકમ

અધરં મધુરં વદનં મધુરમ
નયનં મધુરં હસિતં મધુરમ ।
હૃદયં મધુરં ગમનં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 1 ॥

વચનં મધુરં ચરિતં મધુરમ
વસનં મધુરં વલિતં મધુરમ ।
ચલિતં મધુરં ભ્રમિતં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 2 ॥

વેણુર્મધુરો રેણુર્મધુરઃ
પાણિર્મધુરઃ પાદૌ મધુરૌ ।
નૃત્યં મધુરં સખ્યં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 3 ॥

ગીતં મધુરં પીતં મધુરમ
ભુક્તં મધુરં સુપ્તં મધુરમ
રૂપં મધુરં તિલકં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 4 ॥

કરણં મધુરં તરણં મધુરમ
હરણં મધુરં સ્મરણં મધુરમ
વમિતં મધુરં શમિતં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 5 ॥

ગુંજા મધુરા માલા મધુરા
યમુના મધુરા વીચી મધુરા ।
સલિલં મધુરં કમલં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 6 ॥

ગોપી મધુરા લીલા મધુરા
યુક્તં મધુરં ભુક્તં મધુરમ
ધૃષ્ટં મધુરં શિષ્ટં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 7 ॥

ગોપા મધુરા ગાવો મધુરા
યષ્ટિર્મધુરા સૃષ્ટિર્મધુરા ।
દલિતં મધુરં ફલિતં મધુરમ
મધુરાધિપતે અખિલં મધુરમ ॥ 8 ॥